# Shri Ramachandra Stava

# શ્રીરામચન્દ્રસ્તવઃ

## Document Information

Text title : Ramachandra Stava

File name : rAmachandrastavaH.itx

Category : raama, ApaTIkara

Location : doc_raama

Author : ma. sa. ApaTIkara

Transliterated by : Mandar Mali aryavrutta gmail.com

Proofread by : Mandar Mali aryavrutta gmail.com

Description/comments : stotrapanchadashI by Shri M. S. Apatikar, Satara

Source : Sharada year 11, Vol 21-22, September 1970

Acknowledge-Permission: Pt. Vasant A. Gadgil, Sharada Gaurava Granthamala, 425 Sadashv Peth, Pune 30

Latest update : September 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 15, 2019

*sanskritdocuments.org*

# શ્રીરામચન્દ્રસ્તવઃ

(ચામરમ્)
સૂર્યવંશસમ્ભવોઽપિ ચન્દ્ર કાન્તિશીતલો
ભૂપતિસ્તથાપિ નિર્જિતેન્દ્રિયો રઘૂત્તમઃ ।
નીલનીરદાભકાન્તિમીશ્વરં ધનુર્ધરં
રાઘવં નમામ્યહં સદૈવ સાધુસેવિતમ્ ॥ ૧॥

યજ્ઞરક્ષણાય શૈશવેઽપિ રાક્ષસા હતા
શમ્ભુચાપભઞ્જનેન જાનકી ત્વયા વૃતા ।
વિષ્ણુકાર્મુકે શરં નિયુજ્ય ભાર્ગવો જિતસ્
ત્વાં નમન્તિ ભક્તિતઃ સુરાઃ સદૈવ હે વિભો ॥ ૨॥

તાટકા ત્વયા હતા મદોદ્ધતા મહાવને
દૂષણાદિદાનવાસ્ત્વયા વને વિનાશિતાઃ ।
તપ્ત-કાઞ્ચનાભ-કાન્તિ-ભાસુરો મૃગો વને
પ્રાપિતોઽન્તકાન્તિકં શરેણ રાઘવ દ્રુતમ્ ॥ ૩॥

મેઘનાદ-કુમ્ભકર્ણ-રાવણાદિ-રાક્ષસા
વિક્રમેણ લીલયા ત્વયા હતા રણાઙ્ગણે ।
લોકરઞ્જનાય જાનકી વિસર્જિતા પ્રિયા
ત્વાં નમામ્યહં સદૈવ રામચન્દ્ર ભૂપતે ॥ ૪॥

એકબાણમેકવાક્યમેકભાર્યકં વિભો
ત્વાં સ્તુવન્તિ સાધવો સદેવ ભક્તિચેતસા ।
ધર્મરક્ષણાય કાનનં ત્વયાઽઽશ્રિતં પ્રભો
ત્વામનન્યભક્તિતશ્ચ પૂજયન્તિ માનવાઃ ॥ ૫॥

વાનરેન્દ્ર-વાલિ-નાશકાય રામ તે નમઃ
સિન્ધુગર્વનાશકાય રામચન્દ્ર તે નમઃ ।
વાયુનન્દનાદિ-વાનરઃ સદૈવ સેવિતં

લક્ષ્મણાગ્રજં ચ જાનકી-પતિં નમામ્યહમ્ ॥ ૬॥

ત્યક્તયૌવરાજ્યમાર્જવેન યુક્તમીશ્વરં
વ્યાઘ્રસર્પયુક્તકાનનં ગતં નૃપેશ્વરમ્ ।
રાજરત્નમાલિકાસુ સુપ્રતિષ્ઠિતં નપં
સાદરં સદૈવ નૌમિ ભક્તિ-યક્ત-ચેતસા ॥ ૭॥

ત્વત્સમો ન ભૂપતિર્ભુવિ પ્રભો વિરાજતે
ત્વત્સમો સુતોઽપિ દેવ નાન્યતો હિ દૃશ્યતે ।
પ્રીતિયુક્તમાનસઃ પતિશ્ચ નાપરો જને
ત્વામનન્યમાનસો નમસ્કરોમિ સન્તતમ્ ॥ ૮॥

પાપનાશિની તથૈવ સર્વકામદાયિની
શક્તિ-કીતિ-મુક્તિદાં સ્મરેદ્ રઘોઃ કથાં સદા ।
રામચન્દ્ર-ભૂપતેઃ સ્તવં સદૈવ યઃ પઠેત
તસ્ય તુષ્ટમાનસો પ્રભુર્દયામયો ભવેત્ ॥ ૯॥

ઇતિ શ્રી આપટીકરવિરચિતઃ શ્રીરામચન્દ્રસ્તવઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Mandar Mali aryavrutta gmail.com

---

*Shri Ramachandra Stava*

pdf was typeset on September 15, 2019

Please send corrections to *sanskrit@cheerful.com*